COMPILED & CIRCULATED BY
TUMPA JANA(ASSISTANT PROFESSOR)
DEPT. OF SANSKRIT
NARAJOLE RAJ COLLEGE

# यमकालंकारः

आचार्येण मम्मटेन यमकालंकारस्य संज्ञा दीयते काव्यप्रकाशग्रन्थस्य नवमोल्लासे।उक्तं च तेन-

"अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः।यमकम्"।

अर्थात् अर्थे सति भिन्नार्थानां वर्णानां सा पूर्वोक्तक्रमेण स्थिता पुनः श्रुतिः(आवृत्तिः)यमकालंकारः।यमकोदाहरणेषु पदद्वयमपि क्वचिद् सार्थकं क्वचिन्निरर्थकं भवति।क्वचिद् एकं पदं सार्थकम्,अपरं निरर्थकं भवति इत्यत उक्तम्- "अर्थे सत्यर्थभिन्नानाम्" इति।मम्मटेनापि उक्तम्-"समरसमरसोऽयम्' इत्यादावेकेषामर्थसत्वेऽन्येषामनकर्थकत्वे भिन्नार्थानामिति न युज्यते वक्तुमिति 'अर्थे सती'त्युक्तम्।"

क्वचिद् वर्णभेदेऽपि श्रुतिसाम्येन यमकं भवति।तदुक्तं काव्यप्रकाशविस्तारिता इति टीकायाम्-

"यमकादौ भवेदैक्यं डलयो रलयोर्बवोः।

शषयोर्नणयोश्चान्ते सविसर्गाविसर्गयोः।

सबिन्दुकाबगन्दुकयोः स्यादभेदकल्पनम्।।"

यथा 'भुजलतां जड़ताम्' इत्यत्र डकारलकारयोर्भेदेऽपि यमकं भवति।वस्तुतः अत्र वर्णानां भेदे अपि श्रुतिसाम्येन यमकालंकारः अस्ति।

यमकालंकारे स्वरव्यञ्जनसमुदायस्य तेनैव क्रमेण पूर्वोपात्तक्रमेणैव आवृत्तिः भवति।अर्थात् क्रमभङ्गे न यमकालंकारः।तस्मात् मम्मटाचार्यः अवदत्-"सेति 'सरो रस' इत्यादिवैलक्षण्येन तेनैव क्रमेण स्थिता"।

ननु यमकालाटानुप्रासयोः को भेदः,इति चेत्?शृणु प्रकृत्यर्थभेदे यमकम्,प्रकृत्यर्थभेदस्य अभावे तात्पर्यमात्रभेदे लाटानुप्रास इति।तस्मात् लाटानुप्रासे अतिव्याप्तिवारणाय मम्मटेन उक्तम् 'अर्थभिन्नानाम्' इति।पुनः 'सरो रसः' इत्यादौ वृत्यनुप्रासे अतिव्याप्तिं वारणाय 'सा पुनः श्रुतिः' इत्युक्तम्।

यमकालंकारस्य वहुभेदः अस्ति।अतः मम्मटेन उक्तम्-

"पादतद्भागवृत्ति तद्यात्यनेकताम्"।

अतः यमकस्य विविधप्रकारस्य उल्लेखः कृतः काव्यप्रकाशकारेण।तस्मात् उक्तम्- "प्रथमो द्वितीयादौ , द्वितीयस्तृतीयादौ , तृतीयश्चतुर्थे प्रथमादिष्वपीति सप्त। प्रथमो द्वितीये तृतीयश्चतुर्थे , प्रथमश्चतुर्थे द्वितीयस्तृतीये इति द्वे । तदेवं पादजं नवभेदम् । अर्धावृत्तिः श्लोकावृत्तिश्चेति द्वे ।

द्विधा विभक्ते पादे प्रथमादिपादादिभागः पूर्ववत् द्वितीयादिपादादिविभागेषु , अन्तभागोऽन्तभागेष्विति विंशतिर्भेदाः । श्लोकान्तरे हि नासौ भागावृत्तिः । त्रिखण्डे त्रिंशत् चतु : खण्डे चत्वारिंशत् । प्रथमपादादिगतान्त्यार्धादिभागो द्वितीयपादादिगते आद्यार्धादिभागे यम्यते इत्याद्यन्वर्थतानुसरणेनानेकभेदम् । अन्तादिकमाद्यन्तिकम् तत्समुच्चयः , मध्यादिकमादिमध्यमन्तमध्यं मध्यान्तिकं तेषां समुच्चयः तथा तस्मिन्नेव पादे आद्यादिभागानां मध्यादिभागेषु अनियते च स्थाने आवृत्तिरिति प्रभूततमभेदम् । तदेतत्काव्यान्तर्गडुभूतमिति नास्य भेदलक्षणं कृतम् ।"

मम्मटाचार्यः दिङ्मात्रम् उदाह्रियते काव्यप्रकाशे।तेषु एकं यथा-

"सन्नारीभरणोमायमाराध्य विधुशेखरम्।
सन्नारीभरणोऽमायस्ततस्त्वं पृथिवीं जय"।।

अस्मिन् उदाहरणे 'सन्नारीभरणो' पदस्य पुनः आवृत्तिः भवति।अत्र अर्थे सति भिन्नार्थस्य पुनः आवृत्तिः स्यात् यमकालंकारः अस्ति।इदं तु द्वितीयप्रकारं यमकम्।।

Ref.-

(1)কাব্যপ্রকাশ(নবম ও দশম উল্লাস)।

(2)काव्यप्रकाशरहस्यम्